# Suryashtottarashatanamastotra by vishvakarma

# નરસિંહપુરાણે સૂર્યાષ્ટોત્તરશતનામસ્તોત્રં વિશ્વકર્મકૃત

## Document Information

Text title : sUryAShTottarashatanAmastotra vishvakarmakRita narasimhapurANe

File name : sUryAShTottarashatanAmavishvakarmaNP.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 19

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# નરસિંહપુરાણે સૂર્યાષ્ટોત્તરશતનામસ્તોત્રં વિશ્વકર્મકૃત

ભરદ્વાજ ઉવાચ –
યૈઃ સ્તુતો નામભિસ્તેન સવિતા વિશ્વકર્મણા ।
તાન્યહં શ્રોતુમિચ્છામિ વદ સૂત વિવસ્વતઃ ॥ ૧॥

સૂત ઉવાચ –
તાનિ મે શ‍ૃણુ નામાનિ યૈઃ સ્તુતો વિશ્વકર્મણા ।
સવિતા તાનિ વક્ષ્યામિ સર્વપાપહરાણિ તે ॥ ૨॥

આદિત્યઃ સવિતા સૂર્યઃ ખગઃ પૂષા ગભસ્તિમાન્ ।
તિમિરોન્મથનઃ શમ્ભુસ્ત્વષ્ટા માર્તણ્ડ આશુગઃ ॥ ૩॥

હિરણ્યગર્ભઃ કપિલસ્તપનો ભાસ્કરો રવિઃ ।
અગ્નિગર્ભોઽદિતેઃ પુત્રઃ શમ્ભુસ્તિમિરનાશનઃ ॥ ૪॥

અંશુમાનંશુમાલી ચ તમોઘ્નસ્તેજસાં નિધિઃ ।
આતપી મણ્ડલી મૃત્યુઃ કપિલઃ સર્વતાપનઃ ॥ ૫॥

હરિર્વિશ્વો મહાતેજાઃ સર્વરત્નપ્રભાકરઃ ।
અંશુમાલી તિમિરહા ઋગ્યજુસ્સામભાવિતઃ ॥ ૬॥

પ્રાણાવિષ્કરણો મિત્રઃ સુપ્રદીપો મનોજવઃ ।
યજ્ઞેશો ગોપતિઃ શ્રીમાન્ ભૂતજ્ઞઃ ક્લેશનાશનઃ ॥ ૭॥

અમિત્રહા શિવો હંસો નાયકઃ પ્રિયદર્શનઃ ।
શુદ્ધો વિરોચનઃ કેશી સહસ્રાંશુઃ પ્રતર્દનઃ ॥ ૮॥

ધર્મરશ્મિઃ પતંગશ્ચ વિશાલો વિશ્વસંસ્તુતઃ ।
દુર્વિજ્ઞેયગતિઃ શૂરસ્તેજોરાશિર્મહાયશાઃ ॥ ૯॥

ભ્રાજિષ્ણુર્જ્યોતિષામીશો વિજિષ્ણુર્વિશ્વભાવનઃ ।
પ્રભવિષ્ણુઃ પ્રકાશાત્મા જ્ઞાનરાશિઃ પ્રભાકરઃ ॥ ૧૦॥

આદિત્યો વિશ્વદૃગ્ યજ્ઞકર્તા નેતા યશસ્કરઃ ।
વિમલો વીર્યવાનીશો યોગજ્ઞો યોગભાવનઃ ॥ ૧૧॥

અમૃતાત્મા શિવો નિત્યો વરેણ્યો વરદઃ પ્રભુઃ ।
ધનદઃ પ્રાણદઃ શ્રેષ્ઠઃ કામદઃ કામરૂપધૃક્ ॥ ૧૨॥

તરણિઃ શાશ્વતઃ શાસ્તા શાસ્ત્રજ્ઞસ્તપનઃ શયઃ ।
વેદગર્ભો વિભુર્વીરઃ શાન્તઃ સાવિત્રિવલ્લભઃ ॥ ૧૩॥

ધ્યેયો વિશ્વેશ્વરો ભર્તા લોકનાથો મહેશ્વરઃ ।
મહેન્દ્રો વરુણો ધાતા વિષ્ણુરગ્નિર્દિવાકરઃ ॥ ૧૪॥

એતૈસ્તુ નામભિઃ સૂર્યઃ સ્તુતસ્તેન મહાત્મના ।
ઉવાચ વિશ્વકર્માણં પ્રસન્નો ભગવાન્ રવિઃ ॥ ૧૫॥

ભ્રમિમારોપ્ય મામત્ર મણ્ડલં મમ શાતય ।
ત્વત્બુદ્ધિસ્થં મયા જ્ઞાતમેવમૌષ્ણ્યં શમં વ્રજેત્ ॥ ૧૬॥

ઇત્યુક્તો વિશ્વકર્મા ચ તથા સ કૃતવાન્ દ્વિજ ।
શાન્તોષ્ણઃ સવિતા તસ્ય દુહિતુર્વિશ્વકર્મણઃ ॥ ૧૭॥

સંજ્ઞાયાશ્ચાભવદ્વિપ્ર ભાનુસ્ત્વષ્ટારમબ્રવીત્ ।
ત્વયા યસ્માત્ સ્તુતોઽહં વૈ નામ્નામષ્ટશતેન ચ ॥ ૧૮॥

વરં વૃણીષ્વ તસ્માત્ ત્વં વરદોઽહં તવાનઘ ।
ઇત્યુક્તો ભાનુના સોઽથ વિશ્વકર્માબ્રવીદિદમ્ ॥ ૧૯॥

વરદો યદિ મે દેવ વરમેતં પ્રયચ્છ મે ।
એતૈસ્તુ નામભિર્યસ્ત્વાં નરઃ સ્તોષ્યતિ નિત્યશઃ ॥ ૨૦॥

તસ્ય પાપક્ષયં દેવ કુરુ ભક્તસ્ય ભાસ્કર ॥ ૨૧॥

તેનૈવમુક્તો દિનકૃત્ તથેતિ
ત્વષ્ટારમુક્ત્વા વિરરામ ભાસ્કરઃ ।
સંજ્ઞાં વિશઙ્કાં રવિમણ્ડલસ્થિતાં
કૃત્વા જગામાથ રવિં પ્રસાદ્ય ॥ ૨૨॥

ઇતિ શ્રીનરસિંહપુરાણે એકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

From Narasimhapurana adhyAya 19

https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

---

*Suryashtottarashatanamastotra by vishvakarma*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*